# Shivaproktam Kashisthita Muktimandapamahatmyam

# શિવપ્રોક્તં કાશીસ્થિત મુક્તિમણ્ડપમાહાત્મ્યમ્

## Document Information

Text title : Shivaproktam Kashisthita Muktimandapamahatmyam

File name : shivaproktaMkAshIsthitamuktimaNDapamAhAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 7 | vAvRittashlokAH ||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાશીસ્થિત મુક્તિમણ્ડપમાહાત્મ્યમ્

- શિવપાર્વતીસંવાદે -
શ્રીપાર્વત્યુવાચ -
વિશ્વેશ્વરાખિલારાધ્ય સર્વજ્ઞ કરુણાનિધે ।
ક્વ મુક્તિમણ્ડપસ્થાનાં તત્પ્રમાણં કિયન્મતમ્ ॥ ૧॥

મુક્તિમણ્ડપસંજ્ઞાપિ કથમસ્યાભવચ્છુભા ।
એતત્સર્વં વિશેષેણ શ્રોતુમિચ્છામિ શઙ્કર ॥ ૨॥

શ્રીસદાશિવ ઉવાચ -
અતિ કષ્ટમિદં પૃષ્ટમિદાનીં વરવર્ણિનિ ।
મુક્તિમણ્ડપમાહાત્મ્યં શૃણુ વક્ષ્યે મનોહરમ્ ॥ ૩॥

યત્ર જ્યોતિર્મયં લિઙ્ગં મમ વિશ્વેશ્વરાભિધમ્ ।
તત્રાસ્તિ રત્નપ્રસાદઃસર્વલોકમનોહરઃ ॥ ૪॥

તત્પ્રસાદપ્રભાસઙ્ગૈર્દિશઃ પ્રતિદિશાસ્તથા ।
અત્યૂર્ધ્વલોકાસ્સર્વેઽપિ દીપિતાઃ સમલઙ્કૃતાઃ ॥ ૫॥

પ્રાસાદોઽપિ સરત્નાઢ્યો લિઙ્ગાકારો વિરાજતે ।
તન્મૂલમગ્રભાગો વા ન કેનાપિ ચ દૃશ્યતે ॥ ૬॥

અનર્ઘ્યરત્નમાલાભિઃ સર્વદાલઙ્કૃતાઃ શુભાઃ ।
મુક્તામાલાપરિવૃતો મૂલભાગોઽસ્ય સર્વદા ॥ ૭॥

પ્રાસાદદિવ્યરત્નાનિ રાત્રૌ દીપા ઇવામ્બિકે ।
તિષ્ઠન્ત્યત્યન્તરમ્યાણિ નેત્રોત્સવકરાણિ ચ ॥ ૮॥

કદાચિદપ્યન્ધકારસમ્બન્ધસ્તત્ત સર્વદા(થા) ।
નાસ્ત્યેવ રત્નદીપૌઘસમ્બન્ધેન વરાનને ॥ ૯॥

સહસ્રરત્નશૃઙ્ગાણાં રાજતે તત્ર સર્વદા ।

લિઙ્ગાકારાણિ શ‍ૃઙ્ગાણિ શુદ્ધાન્યપ્રતિમાનિ ચ ॥ ૧૦॥

તેજઃ પુઞ્જમિવાભાતિ પ્રાસાદઃ સર્વદા શુભે ।
રત્નપુઞ્જમયઃ પ્રીતિં સન્તનોતિ નિરન્તરમ્ ॥ ૧૧॥

રાશીકૃતમહારત્નપ્રભેયમિતિ ધીઃસદા ।
સર્વેષાં ભવતિસ્પષ્ટં તત્પ્રાસાદાવલોકનાત્ ॥ ૧૨॥

વિલાસસદનં રમ્યં મમ તાદૃશમમ્બિકે ।
નાન્યત્ર દૃશ્યતે ભવ્યં નિત્યોત્સાહકરં પરમ્ ॥ ૧૩॥

સહસ્રકોટિગણપૈરત્યુગ્રૈરુદ્યતાયુધૈઃ ।
વીરૈઃ સંરક્ષ્યતે નિત્યં પ્રાસાદો વિમલો મમ ॥ ૧૪॥

શ્રાવ્યો દુન્દુભિનિર્હ્રાદો જાયતે તત્ર સર્વદા ।
ગાયન્તિ ગાયકા નિત્યં શિવનામાનિ સાદરમ્ ॥ ૧૫॥

નૃત્યન્તિ નર્તકાશ્ચાત્ર ચિત્રનૃત્યવિશારદાઃ ।
મન્દારપુષ્પસઞ્છન્નો રત્નતોરણસંવૃતઃ ॥ ૧૬॥

નિત્યાનન્દકરો ભવ્યઃ સર્વમઙ્ગલસંશ્રયઃ ।
દૈવૈરારાધિતો નિત્યં ધ્યાતચ સકલૈઃ સુરૈઃ ॥ ૧૭॥

તત્પ્રાસાદસમાલોકે પ્રાસાદો નૈવ દૃશ્યતે ।
સર્વેષાં મુક્તિદો નિત્યં દર્શનાદેવ સર્વથા ॥ ૧૮॥

તત્ર લિઙ્ગં મમાસ્ત્યેકં રમ્યં વિશ્વેશ્વરાભિધમ્ ।
તત્પ્રભાવો ન દેવૈશ્ચ શક્યતે જ્ઞાતુમમ્બિકે ॥ ૧૯॥

તલ્લિઙ્ગતત્ત્વમમલૈર્વેદૈરપિ ન નિશ્ચિતમ્ ।
તત્સ્વરૂપં કથં જ્ઞેયં તદન્યૈરલ્પબુદ્ધિભિઃ ॥ ૨૦॥

વેદૈરપિ યથાશક્તિ તદેવ પ્રતિપાદ્યતે ।
તદેવોપાસ્યમખિલૈસ્તદેવાભીષ્ટદાયકમ્ ॥ ૨૧॥

તદનિર્દેશ્યમમલમપ્રમેયમનામયમ્ ।
નિષ્કલઙ્કં નિરાકારં તદેવ હિ નિરઞ્જનમ્ ॥ ૨૨॥

તદેવ નિધનેત્યાદિમન્ત્રવેદ્યં યથાત્મકમ્ ।
દર્શનાદેવ સર્વેષાં મોક્ષદં તત્સનાતનમ્ ॥ ૨૩॥

અનેકકાલમત્યુગ્રં તપઃ કુર્વન્તિ સાદરમ્ ।
વિશ્વેશ્વરાભિધં લિઙ્ગં દ્રષ્ટુમેવ મનીષિભિઃ ॥ ૨૪॥

અનેકકલ્પપર્યન્તમુપવિશ્ય મયાપિ વા ।
પ્રભાવસ્તસ્ય લિઙ્ગસ્ય વક્તવ્યઃ કથમમ્બિકે ॥ ૨૫॥

કદાચિદપિ તલ્લિઙ્ગં ન દૃષ્ટં યેન સર્વદા ।
ન તસ્ય મુક્તિસ્તત્સત્યં સત્યં સત્યં ન સંશયઃ ॥ ૨૬॥

યદર્શનાર્થં મુનયઃ કુર્વન્તિ બહુધા તપઃ ।
તદ્ધિ વૈશ્વેશ્વરં લિઙ્ગં દ્રષ્ટવ્યં બહુયત્નતઃ ॥ ૨૭॥

યન્નપશ્યન્તિ મુનયો યન્ન પશ્યન્તિ દેવતાઃ ।
યન્ન જાનન્તિ વેદાશ્ચ તલ્લિઙ્ગં પ્રેક્ષ્યમન્વહમ્ ॥ ૨૮॥

દ્વિત્રાણ્યતીવ રમ્યાણિ બિલ્વપત્રાણિ સાદરમ્ ।
યેનાર્પિતાનિ તલ્લિઙ્ગે તેન મુક્તિરવાપ્યતે ॥ ૨૯॥

અભિષિચ્ય વિધાનેન યો માં બિલ્વદલૈર્મુદા ।
પૂજયિષ્યતિ પુણ્યાત્મા સ મોક્ષમધિગચ્છતિ ॥ ૩૦॥

મદ્ભક્તેન મયિ પ્રેમ્ણા પત્રં વા ફલમેવ વા ।
દત્તં સ્વોપહૃતં યત્તુ તદ્ગ્રહિષ્યામિ સાદરમ્ ॥ ૩૧॥

એકં બિલ્વદલં રમ્યં મદ્ભક્તેનાર્પિતં મયિ ।
અનન્તાઘહરં નૂનં સત્યમેવોચ્યતે મયા ॥ ૩૨॥

મદ્ભક્તોઽપિ સ વિજ્ઞેયઃ સર્વભાવેન સર્વદા ।
સર્વં વિહાય મામેવ ભજતે યઃ સદા મુદા ॥ ૩૩॥

વિભૂતિરુદ્રાક્ષપરો લિઙ્ગમેવાર્ચયન્મુદા ।
મામેવ શરણં પ્રાપ્તો યઃસ એવ મમ પ્રિયઃ ॥ ૩૪॥

મહાપાશુપતાઃ શુદ્ધામહાશૈવાશ્ચ સર્વદા ।
મામર્ચયન્તિ મામેવ શરણં પ્રાપ્નુવન્તિ ચ ॥ ૩૫॥

મદ્ભક્તવર્યૈઃ સતતં મદર્ચનપરાયણૈઃ ।
અવિમુક્તમિદં ક્ષેત્રમાશ્રિત્ય સ્થીયતે મુદા ॥ ૩૬॥

શૈવૈઃ પાશુપતૈઃ શુદ્ધૈર્મલ્લિઙ્ગં પૂજ્યતે સદા ।
તૈરેવ કૃતપૂજાપિ ગૃહ્યતે સાદરં મયા ॥ ૩૭॥

પત્રં ફલં વા પુષ્પં વા જલં વા સ્વાર્જિતં શુભમ્ ।
મદ્ભક્તેનાર્પિતં મહ્યમનન્તાયોપકલ્પતે ॥ ૩૮॥

પત્રેણાપ્યર્ચિતં લિઙ્ગં મોક્ષદં સર્વદેહિનામ્ ।
વિશ્વેશ્વરાભિધં તત્તુ તત્પ્રાસાદેઽધિતિષ્ઠતિ ॥ ૩૯॥

તત્પ્રાસાદવરસ્યૈવ દક્ષિણાદિશિ ભાસુરમ્ ।
રમ્યં મણિમયં સ્થાનમેકં તિષ્ઠતિ પાપહમ્ ॥ ૪૦॥

તત્સહસ્રમણિસ્તમ્ભૈરુત્તમૈરુન્નતૈઃ શુભૈઃ ।
રઞ્જિતં રાજિતૈઃશૃઙ્ગૈર્હેમશૃઙ્ગશ્ચ રાજિતમ્ ॥ ૪૧॥

ક્વચિત્સ્ફટિકશૃઙ્ગૌઘૈર્લિઙ્ગાકારૈર્મનોહરૈઃ ।
સ્થાનં તદ્રાજતે દેવિ નેત્રોત્સવકરં સદા ॥ ૪૨॥

તત્પાલકાશ્ચતુષ્ષષ્ટિકોટિ પ્રથમ નાયકાઃ ।
ઉદાયુધા મહાવીરા મમ પ્રિયકરાઃ સદા ॥ ૪૩॥

તસ્મિન્નેવ મહાસ્થાને શૈવાસ્તત્પાલકાજ્ઞયા ।
ઉપવિશ્યાતિસન્તુષ્ટાસ્તિષ્ઠન્તિ શિવપૂજકાઃ ॥ ૪૪॥

સાદરં ભસ્મદિગ્ધાઙ્ગા રુદ્રાક્ષાભરણપ્રિયાઃ ।
રુદ્રસૂક્તજપાસક્તાસ્તિષ્ઠન્તિ વિમલાશયાઃ ॥ ૪૫॥

શૈવં મહામુનિં(મનું) નિત્યં સર્વપાપૌઘશામકમ્ ।
જપતઃ સતતં સન્તો વસન્ત્યત્યન્તમાદરાત્ ॥ ૪૬॥

શુદ્ધાન્તઃ કરણૈસ્તત્ર જપ્તઃશૈવૈર્મહામનુઃ ।
શૈવો મોક્ષપ્રદો નૂનં ભવત્યેવ ન સંશયઃ ॥ ૪૭॥

એકદાપ્યત્ર શૈવેન જપ્યઃ શૈવો મનુર્મુદા ।
અનન્તગુણિતો નૂનં પાપદાવાગ્નિશામકઃ ॥ ૪૮॥

શૈવો મનુઃસ્વતઃ શુદ્ધઃ પાપતૂલાદિ નાશકઃ ।
સોઽપ્યત્ર જપ્તઃ શૈવેન્દ્રૈ સર્વાભીષ્ટપ્રદો ધ્રુવમ્ ॥ ૪૯॥

શૈવ એવ મહામન્ત્રો જપ્યઃ પઞ્ચાક્ષરઃ પરઃ ।
શૈવૈર્મોક્ષાર્થિભિર્નિત્યં મન્ત્રવલ્લિઙ્ગપૂજકૈઃ ॥ ૫૦॥

તન્મધ્યે કર્ણિકારા રત્નરાજિવિરાજિતા ।

અત્યુન્નતા વેદિકૈકા તિષ્ઠતિ પ્રિયદર્શના ॥ ૫૧॥

તન્મધ્યે યેક(ચૈક) કાશ્મીરમણિરાજિતમાનસં(સનમ્) ।
સ્થિતં તદુપરિ સ્પષ્ટમુપવિષ્ટં મયા પુરા ॥ ૫૨॥

તદાનીમાગતા કાચિદિન્દુબિમ્બનિભાનના ।
વિશાલપદ્મપત્રાભનયના નયનપ્રિયા ॥ ૫૩॥

મન્દારમાલામમલામમ્લાનાં મધુપાવૃતામ્ ।
ધૃત્વા પદ્માભહસ્તેન ક્ષૌમામ્બરવિરાજિતા ॥ ૫૪॥

સા માં દૃષ્ટ્વાનતગ્રીવા પ્રણમ્ય મુહુરાદરાત્ ।
બિલ્વૈર્મન્દારપુષ્પૈશ્ચ ચક્રે પૂજાં યથાવિધિ ॥ ૫૫॥

પૂજયિત્વા તતઃ સા માં કૃતાઞ્જલિપુટા તદા ।
ઇદમેવ વચઃ પ્રાહ સ્તોત્રૈઃ સ્તુત્વાહ્યનેકધા ॥ ૫૬॥

મહેશદિવ્યસ્થાનાનિ સન્તિ કાશ્યામનેકધા ।
કિમત્ર રોચતે નિત્યં વસતિસ્તવ શઙ્કર ॥ ૫૭॥

વિશેષઃ કોઽત્ર દેવેશ સર્વસ્થાનવિલક્ષણઃ ।
કિમસ્તિ તત્ત્વમેતસ્ય વદ સર્વં વિશેષતઃ ॥ ૫૮॥

પૃષ્ટોઽહમેવં સુભગે તયા તદનુ સાદરમ્ ।
ઉત્તરં દત્તવાનસ્મિ તમે(દે)વ શૃણુ સાદરમ્ ॥ ૫૯॥

કાશીયં સર્વલોકેભ્યો મમ પ્રિયકરાઽનઘે ।
તત્રાપ્યન્તર્ગૃહન્નામ ક્ષેત્રં રુચિકરં મમ ॥ ૬૦॥

તન્મધ્યગમિદં રમ્યં સ્થાનં પ્રિયતરં મમ ।
તત્તુ લિઙ્ગમયં યસ્માત્તત્રપ્રીતિર્મમાનઘે ॥ ૬૧॥

યાથત્ર વસતિર્નિત્યં તથા નાન્યત્ર શોભને ।
અનિશં પ્રીતિરત્રૈવ મમ તિષ્ઠત્યનામયે ॥ ૬૨॥

કિઞ્ચ કાશ્યાં મૃતાન્ સર્વાન્ શિવદેહાન્ શિવાર્ચકાન્ ।
શિવૈકશરણાનત્ર સમાનીય તતઃ પરમ્ ॥ ૬૩॥

એતત્સિહ્માસને સમ્યગુપવિશ્ય યથા સુખમ્ ।
મમાઙ્કે વિમલે શુદ્ધે શૈવં સંવેશ્ય સાદરમ્ ॥ ૬૪॥

શૈવાયાત્યન્તશુદ્ધાય મુક્ત્યર્થં તદનન્તરમ્ ।
શૈવઃ પઞ્ચાક્ષરો મન્ત્રો મયાહ્યત્રોપદિશ્યતે ॥ ૬૫॥

મુક્તિમણ્ડપસંજ્ઞાસ્ય સ્થાનસ્ય શ્રુતિસમ્મતા ।
યતો મયા મનુઃશૈવો મોક્ષાયાત્રૈવ દીયતે ॥ ૬૬॥

- -

ઇદમેવ મહત્સ્થાનં મુક્તિમણ્ટપસંજ્ઞકમ્ ।
યત્રોપદિશ્યતે મન્ત્રઃ શૈવાનાં મુક્તિકાઙ્ક્ષિણામ્ ॥ ૧૦૩॥

અનન્યશરણાનાં તુ મદ્ભક્તાનામઘાપહમ્ ।
તતઃ પ્રવિશ્યધર્માત્મા મહાશૈવાશ્રયં સદા ॥ ૧૦૪॥

મુક્તિમણ્ટપમત્યન્તસુખં પ્રાપ્ય દ્વિજોત્તમઃ ।
તતો મમાન્તિકં પ્રાપ્ય ચકારાભ્યર્ચનં મુદા ॥ ૧૦૫॥

મમૈવ લિઙ્ગે વિમલે મુક્તિદે વેદસંસ્તુતે ।
તતઃ પ્રણમ્ય બહુધા સ્તુત્વા સ્તોત્રૈરનેકધા ॥ ૧૦૬॥

ચકાર નૃત્યં બહુધા સાદરં ભક્તિપૂર્વકમ્ ।
ઉપવિશ્ય તતોઽત્રૈવ જપ્ત્વા મન્ત્રં શિવાત્મકમ્ ॥ ૧૦૭॥

તતોઽન્તર્ગૃહયાત્રાદિ કૃત્વા ભક્તિપુરઃસરમ્ ।
જ્ઞાનવાપીતટે રમ્યે નિરાહારો જિતેન્દ્રિયઃ ॥ ૧૦૮॥

ચકારોગ્રં તપઃસમ્યઙ્મુક્ત્યર્થં શૈવપુઙ્ગવઃ ।
શિવૈકનિરતો નિત્યં ષટ્સહસ્રયુગાવધિ ॥ ૧૦૯॥

મન્ત્રાધિરાજમમલં જપ્ત્વા પાપૌઘનાશનમ્ ।
તતઃ શરીરં વિજહૌ જ્ઞાનવાપીતટે શુભે ॥ ૧૧૦॥

લિઙ્ગપૂજાં પ્રકુર્વાણો વદન્ શિવ શિવેતિ ચ ।
તતો મમાઙ્ગ સંવિશ્ય મમૈવાનુગ્રહાદ્ દ્વિજઃ ॥ ૧૧૧॥

મન્ત્રાધિરાજમમલં જપન્ પાપૌઘનાશનમ્ ।
શૈવં પ્રાપ્યમહામન્ત્રં મોક્ષં સમ્પ્રાપ્ય શોભતે ॥ ૧૧૨॥

ઇત્યુક્ત્વા સા મનોરમ્યા મુક્તિમણ્ટપદેવતા ।
યયૌ સ્વ સદનં રમ્યમમ્બિકે વરવર્ણિનિ ॥ ૧૧૩॥

યે મુક્તિમણ્ટપમનઘ્યમનન્યલભ્યં સમ્પ્રાપ્ય શૈવમનુમપ્યતિપુણ્યલભ્યમ્ ।

સમ્પૂજયન્તિ શિવમેકમુપાસ્યમીશં તે સર્વથા મુનિવરાઃ શિવમાપ્નુવન્તિ ॥ ૧૧૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં કાશીસ્થિતં મુક્તિમણ્ડપમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૭ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 7 . vAvRRittashlokAH ..

Notes:
Śiva શિવ details to Parvatī પાર્વતી, about the eminence of the Muktīmaṇḍapa મુક્તિમણ્ડપ near Jñānavāpī જ્ઞાનવાપી at Viśveśvara Jyotirliṅga Sthāna વિશ્વેશ્વર જ્યોતિર્લિઙ્ગ સ્થાન in Kaśī કાશી. Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

---

*Shivaproktam Kashisthita Muktimandapamahatmyam*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*